|| শ্রী ||

অথ শ্রী ত্রিবিক্রমপংডিতাচার্য়সুত শ্রী নারায়ণপংডিতাচার্য়বিরচিতঃ

|| শ্রী মধ্ববিজয়ঃ ||

২. দ্বিতীয়ঃ সর্গঃ

বিজ্ঞানভানুমতি কালবলেন লীনে
দুর্ভাষ্যসংতমসসংততিতো জনেঽংধে |
মার্গাত সতাং স্খলতি খিন্ন হৃদো মুকুংদং
দেবাশ্চতুর্মুখমুখাঃ শরণং প্রজগ্মুঃ || ২.১ ||
নাথঃ কলৌ ত্রিয়ুগহূতিরনুদ্বুভূষুঃ
ব্রহ্মাণমপ্যনবতারমনাদিদিক্ষুঃ |
সর্বজ্ঞমন্যমনবেক্ষ্য স কার্য়বীর্য়ং
স্মেরাননো ভুবনজীবনমাবভাষে || ২.২ ||
বেদাংতমার্গপরিমার্গণদীনদৃনাঃ
দৈবীঃ প্রজা বিশরণাঃ করুণাপদং নঃ |
আনংদয়েঃ সুমুখ ভূষিতভূমিভাগো
রূপাংতরেণ মম সদ্গুণনির্ণয়েন || ২.৩ ||
আদেশমৌলিমণিমুজ্জ্বলবর্ণমেনং
বদ্ধাংজলির্মরুদনর্ঘমধত্ত মূর্ধ্না ||
হারাবলীমিব হৃদা বিবুধেংদ্রয়াচ্ঞাং
বিভ্রন্নিজাননুজিঘৃক্ষুরবাতিতীর্ষত || ২.৪ ||
কালঃ স এব সমবর্তত নাম য়াবত
চিংতাকুলং বিবিধসাধুকুলং বভূব |
বেদাংতসংততকৃতাংতরসং ন বিদ্মঃ
শ্রেয়ো লভেমহি কথং নু বয়ং বতেতি || ২.৫ ||

তৎপ্রীতয়ে রজতপীঠপুরাধিবাসী দেবো
বিবেশ পুরুষং শুভসূচনায় |
প্রাপ্তে মহায় মহিতায় মহাজনৌঘে
কোলাহলেন সকুতূহলিনি প্রবৃত্তে || ২.৬ ||
আবিষ্টবানকুশলং পুরুষং প্রকৃত্যা
প্রত্যায়য়ন্নিহ জনান নিতরামনৃত্যত |
উত্তুংগকেতুশিখরে স কৃতাংগহারো
রংগাংতরে নট ইবাখিলবিস্ময়াত্মা || ২.৭ ||
আভাষ্য সোঽত্র জনতাং শপথানুবিদ্ধং
উচ্চৈরিদং বচনমুদ্ধৃতদোর্বভাষে |
উৎপৎস্যতে জগতি বিশ্বজনীনবৃত্তিঃ
বিশ্বজ্ঞ এব ভগবানচিরাদিহেতি || ২.৮ ||

সদ্বীপবারিনিধিসপ্তকভৃতধাত্র্যা
মধ্যেঽপি কর্মভুবি ভারত নাম খংডে |
কালে কলৌ সুবিমলান্বয়লব্ধজন্মা
সন্মধ্যগেহকুলমৌলিমণির্দ্বিজোঽভূত || ২.৯ ||
বেদাদ্রিসদ্রজয়পীঠপুরেশ্বরাভ্যাং
গ্রামো বিভূষিততরঃ শিবরূপ্যনামা |
হেমাদ্রিরাজবিভুরাজদিলাবৃতাভঃ তস্যা-
ভবদ গুরুগুণঃ খলু মূলভূমিঃ || ২.১০ ||
রামাধিবেশিতহরিস্বসৃমৌলিমালা-
রাজদ্বিমানগিরিশোভিতমধ্যুবাস |
ক্ষেত্রং স পাজকপদং ত্রি কুলৈককেতুঃ

কং য়দ দধাতি সততং খলু বিশ্বপাজাত || ২.১১ ||
অর্থং কমপ্যনবমং পুরুষার্থ হেতুং
পুংসাং প্রদাতুমুচিতামুচিতস্বরূপাম |
কন্যাং সুবর্ণলসিতামিব বেদবিদ্যাং
জগ্রাহ বিপ্রবৃষভ প্রতিপাদিতাং সঃ || ২.১২ ||
রেমেঽচ্ছয়োপনিষদেব মহাবিবেকো
ভক্ত্যেব শুদ্ধকরণঃ পরমশ্রিতাঽলম |
মিথ্যাভিমানরহিতঃ পরয়েব মুক্ত্যা
স্বানংদসংততিকৃতা স তয়া দ্বিজেংদ্রঃ || ২.১৩ ||
তস্য প্রভোশ্চরণয়োঃ কুলদেবতায়াঃ
ভক্তিং ববংধ নিজধর্মরতঃ স ধীরঃ |
বিজ্ঞাতভারতপুরাণমহারহস্যং
য়ং ভট্ট ইত্যভিবদংতি জনা বিনীতম || ২.১৪ ||
গোবিংদসুংদরকথাসুধয়া স নৃণাং
আনংদয়ন্ন কিল কেবলমিংদ্রিয়াণি |
কিংতু প্রভো রজতপীঠপুরে পদাব্জং
শ্রীবল্লভস্য ভজতামপি দৈবতানাম || ২.১৫ ||
ইত্থং হরের্গুণকথাসুধয়া সুতৃপ্তো
নৈর্গুণ্যবাদিষু জনেষ্বপি সাগ্রহেষু |
তত্ত্বে স কালচলধীরতিসংশয়ালুঃ ধীমান
ধিয়া শ্রবণশোধিতয়া প্রদধ্যৌ || ২.১৬ ||

ত্রাতা য় এব নরকাত স হি পুত্রনাম

মুখ্যাবনং ন সুলভং পুরুষাদপূর্ণাত |
তস্মাত সমস্তবিদপত্যমবদ্যহীনং
বিদ্যাকরাকৃতি লভেমহি কৈরুপায়ৈঃ || ২.১৭ ||
পূর্বেঽপি কর্দমপরাশরপাংডুমুখ্যাঃ
য়ৎসেবয়া গুণগণাঢ্যমপত্যমাপুঃ |
তং পূর্ণষড্গুণতনুং করুণামৃতাব্ধিং
নারায়ণং কুলপতিং শরণং ব্রজেম || ২.১৮ ||
ইত্থং বিচিংত্য স বিচিংত্যমনন্য বংধুঃ
প্রেষ্ঠপ্রদং রজতপীঠপুরাধিবাসম |
ভক্ত্যা ভবাব্ধিভয়ভংগদয়া শুভাত্মা
ভেজে ভুজংগশয়নং দ্বিষডব্দকালম || ২.১৯ ||
পত্ন্যা সমং ভগবতঃ স ভজন পদাব্জং
ভোগান লঘূনপি পুনর্লঘয়াংচকার |
দাংতং স্বয়ং চ হৃদয়ং দময়াংচকার
স্বচ্ছং চ দেহমধিকং বিমলীচকার || ২.২০ ||
তীব্রৈঃ পয়োব্রতমুখৈর্বিবিধ ব্রতাগ্র্যৈঃ
জায়াপতী গুণগণার্ণবপুত্রকামৌ |
সংপূর্ণপূরুষমতোষয়তাং নিতাংতং
দেবেরিতাবিব পুরাঽদিতিকশ্যপৌ তৌ || ২.২১ ||
নাথস্য ভূরিকরুণাসুধয়াঽভিষিক্তৌ
শ্রীশ্রীধরপ্রততিশারশরীরয়ষ্টী |
ভূরিব্রতপ্রভবদিব্যসুকাংতিমংতৌ
তৌ দেহশুদ্ধিমতিমাত্রমথালভেতাম || ২.২২ ||
কাংতাদৃতৌ সমুচিতেঽথ বভার গর্ভং

সা ভূসুরেংদ্রদুহিতা জগতাং হিতায়।
অচ্ছাংবরেব রজনী পরিপূরিতাশা
ভাবিন্যপাস্ততমসং বিধুমাদ্যপক্ষাত ॥ ২.২৩ ॥
তং পূর্বপক্ষসিতবিংবমিব প্রবৃদ্ধং
য়াবদ দ্বিজেংদ্রবনিতা সুষুবেঽত্র তাবত।
অংশেন বায়ুরবতীর্য় স রূপ্যপীঠে
বিষ্ণুং প্রণম্য ভবনং প্রয়য়ৌ তদীয়ম ॥ ২.২৪ ॥

সংপূর্ণলক্ষণচণং নবরাজমান
দ্বারাংতরং পরমসুংদরমংদিরং তত।
রাজেব সৎপুরবরং ভুবনাধিরাজো
নিষ্কাসয়ন পরমসৌ ভগবান বিবেশ ॥ ২.২৫ ॥
সংতুষ্যতাং সকলসন্নিকরৈরসদ্ভিঃ
খিদ্যেত বায়ুরয়মাবিরভূত পৃথিব্যাম।
আখ্যানিতীব সুরদুংদুভিমংদ্রনাদঃ
প্রাশ্রাবি কৌতুকবশৈরিহ মানুষৈশ্চ ॥ ২.২৬ ॥
নাথং নিষেব্য ভবনানতিদূরমাপ্তঃ
প্রাজ্ঞো মহপ্রকৃতদুংদুভিনাদপূর্বাত।
পুত্রোদ্ভবশ্রবণতো মহদাপ্য সৌখ্যং
জ্ঞানং পরোক্ষপদমপ্যমতেষ্টহেতুম ॥ ২.২৭ ॥
আবিশ্য বেশ্ম নিজনংদনমিংদুবক্ত্রং
ভূয়োঽভিনংদ্য স মুকুংদদয়াং প্রবংদ্য।
জাতস্য তস্য গুণজাতবহস্য জাত-

কর্মাদিকর্মনিবহং বিদধে সুকর্মা || ২.২৮ ||
জ্ঞানার্থমেব য়দভূদসুদেব এষঃ
য়দ বাসুদেবপদভক্তিরতঃ সদাঽসৌ |
তদ বাসুদেবপদমন্ববদন সুরেংদ্রাঃ
তাতেন য়ন্নিগদিতং সুতনামকর্ত্রা || ২.২৯ ||
পাতুং পয়াংসি শিশবে কিল গোপ্রদোঽস্মৈ
পূর্বালয়ঃ স্বসুতসূনুতয়া প্রজাতঃ |
নির্বাণহেতুমলভিষ্ট পরাত্মবিদ্যাং
দানং ধ্রুবং ফলতি পাত্রগুণানুকূল্যাত || ২.৩০ ||
অত্রস্তমেব সততং পরিফুল্লচক্ষুঃ
কাংত্যা বিডংবিতনবেংদু জগত্যনর্ঘম |
তত পুত্ররত্নমুপগৃহ্য কদাচিদাপ্তঃ
স্বস্বামিনে বুধ উপায়নমার্পয়ত সঃ || ২.৩১ ||
নত্বা হরিং রজতপীঠপুরালয়ং
তং বালস্য সংপদমনাপদমর্থয়িত্বা |
সাকং সুতেন পরিবারজনান্বিতোঽসৌ
প্রায়ান্নিশীথসময়ে নিজমেব ধাম || ২.৩২ ||

দোষেয়ুষাং সমমনেন বনেঽতিভীমে
তৎক্রীডিতগ্রহ ইহৈকতমং তুতোদ |
উদ্বাংতরক্তমবলোক্য তমভ্যধায়ি
কেনাপ্যহো ন শিশুতুত কথমেষ ইত্থম || ২.৩৩ ||
আবিশ্য পূরুষমুবাচ মহাগ্রহোঽসৌ

অস্মদ্বিহারসময়োপগতান সমস্তান |
য়চ্ছক্তিগুপ্তিরহিতানলমস্মি হংতুং
লোকেশ্বরঃ স বত বালতমঃ কিলেতি || ২.৩৪ ||
স্তন্যেন বালমনুতোষ্য মুহুঃ স্বধাম্নো
মাতা কদাচন য়য়ৌ বিরহাসহাঽপি |
বিশ্বস্য বিশ্বপরিপালকপালনায়
কন্যাং নিজামনুগুণাং কিল ভীরুরেষা || ২.৩৫ ||
সা বালকং প্ররুদিতং পরিসাংত্বয়ংতী
মুগ্ধাক্ষরেণ বচসাঽনুনিনায় মুগ্ধা |
মা তাত তাত সুমুখেতি পুনঃ প্ররোদীঃ
মাতা তনোতি রুচিতং ত্বরিতং তবেতি || ২.৩৬ ||
রোদে ক্রিয়াসমভিহারত এব বৃত্তে
পোতস্য মাতরি চিরাদপি নাঽগতায়াম |
জগ্রাহ বালমথ চৈক্ষত মাতৃমার্গং
সাঽপি ক্রিয়াসমভিহারত এব বালা || ২.৩৭ ||
কর্তব্যমৌঢ্যমভিপদ্য নিরূপ্য সা তং
প্রাভোজয়ত খলু কুলস্থকুলং প্রপক্বং |
শীতং পয়োঽপি সততং পরিপায়য়ংতী
য়স্যোষ্ণরোগমতিবেলমশংকতাংবা || ২.৩৮ ||
নূনং পিপাসুরতিরোদিতি হংত বালো
ধিঙ মাং দয়াবিরহিতাং পরকৃত্যসক্তাম |
ইত্যাকুলা গৃহমুপেত্য তদা প্রসন্নং
পূর্ণোদরং সুতমবৈক্ষত বিপ্রপত্নী || ২.৩৯ ||
পৃষ্ট্বাঽবগম্য সকলং চ ততঃ প্রবৃত্তং

য়ূনাং চ দুস্সহমিদং শিশুনোপভুক্তম |
ইত্থং বিচিংত্য তনয়াং বহু ভৎসয়ংত্যা
ভীতং তয়োত কুপিতং মনসাঽনুতপ্তম || ২.৪০ ||

আরোগ্যশালিনি তদাঽপি পুরেব পুত্রে
বিস্মেরতামুপজগাম জনন্যমুষ্য |
য়স্য ত্রিলোকজননী জননী বিষেঽপি
পীতে ন বিস্ময়মবাপ সমস্তশক্তেঃ || ২.৪১ ||
স্তন্যং মুহুঃ কিল দদৌ জননী গৃহীত্বা
ক্ষেমায় তং কিল দধজ্জনকো জজাপ |
অন্যো জনোঽপি কিল লালয়তি স্ম কিংতু
সর্বোঽপি তন্মুখসুহাসরসায়নোৎকঃ || ২.৪২ ||
দেবাদিসদ্ভিরনুপালিতয়াঽঽদরেণ
দেব্যাঽঽত্মনেব বিলসৎপদয়া নিতাংতম |
অব্যক্তয়া প্রথমতো বদনেঽস্য বাণ্যা
শালীনয়েব ভুবনার্চিতয়া বিজহ্রে || ২.৪৩ ||
প্রাগিংখণং স্বয়মথ স্থিতিমেষ
চক্রে পশ্চাদ গতিং পরিচয়েন কিল ক্রমেণ |
বিশ্বস্য চেষ্টিতমহো য়দনুগ্রহেণ
সর্বং তদস্য পবনস্য বিডংবনং হি || ২.৪৪ ||
পুচ্ছাংতমচ্ছমবলংব্য কদাচিদেষ
প্রাতর্ব্রজাদ ব্রজত এব নিজর্ষভস্য |
প্রায়াত প্রিয়স্য সহসা স্বজনৈরদৃষ্টৌ

নানাবনেষু চরতশ্চরতস্তৃণানি || ২.৪৫ ||
উত্তুংগশৃংগলসিতস্য মহিষ্ঠমূর্তেঃ
পাদাবৃতাবনিতলস্য সুরংধ্রকস্য |
আশ্রিত্য তস্য শুশুভেঽবয়বৈকদেশং
বালো দিবাকর ইবোদয়পর্বতস্য || ২.৪৬ ||
লীলাং করোতি নু গৃহাংতরগো নু বালঃ
কূপাংতরে নু পতিতঃ প্রকৃতিস্বতংত্রঃ |
ইত্থং বিচিংত্য স মুহুঃ স্বজনো বিমৃগ্য
হংতানবেক্ষ্য তনয়ং হৃদি তাপমাপ || ২.৪৭ ||
বালস্য বালপরিলংবনগোচরং তদ
ব্যশ্বস্যতাপি বচনং বনগোচরোক্তম |
য়ত সায়মৈক্ষত জনঃ শিশুমাব্রজংতম
একাব্দকং বৃষভবালকৃতাবলংবম || ২.৪৮ ||

চিংতামণীংদ্রমিব চিংতিতদং দরিদ্রো
বিজ্ঞানমার্গমিব বিষ্ণুপরং মুমুক্ষুঃ |
নষ্টং চ নংদনমিতি স্বজনোঽস্য লব্ধ্বা
নাথস্য তস্য তমনুগ্রহমেব মেনে || ২.৪৯ ||
লীলাবসানসময়ে সহসা কদাচিদ
আর্যোঽমুনাঽভ্যবহৃতিং প্রতি চোদ্যমানঃ |
রোদ্ধৈষ নোঽস্তি ধনিকো বৃষবিক্রয়ীতি
প্রোবাচ নংদনমুখেংদুমবেক্ষ্য মংদম || ২.৫০ ||
লীলাকরেণ স করেণ সুকোমলেন

www.yousigma.com

বীজাংতরাণি কিল কানিচিদাশু তস্মৈ |
স্মিত্বাঽর্ভকোঽভিমতনিষ্কপদে য়দাঽদা-
দাদত্ত তানি ধনিকো বহুমানপূর্বম || ২.৫১ ||
লব্ধং সুতাদিতি বদন দ্বিজপুংগবেন
কালাংতরে নিজধনে প্রতিদিৎসতেঽপি |
সাক্ষাদমানবনবাকৃতিতঃ স লেভে
বীজচ্ছলেন পুরুষার্থমহো বিশিষ্টম || ২.৫২ ||
বাসুদেবমিহ বাঽসুদেবতা সৎকলামভিননংদ তং জনঃ |
বাসুদেবমিতি বাসুদেবসন্নামকং বিবিধলীলমর্ভকম || ২.৫৩ ||
ইতি বিহরতি মহ্যাং বিষ্ণুদাসেঽপি গূঢে
সমজনি সুজনানাং চিত্তমানংদপূর্ণম |
উদয়তি ঘনমালালীনভানৌ চ ভানৌ
ননু জননয়নাব্জৈর্লভ্যতেঽলং বিকাসঃ || ২.৫৪ ||
|| ইতি শ্রীমৎকবিকুলতিলক ত্রিবিক্রমপংডিতাচার্য়সুত
নারায়ণপংডিতাচার্য়বিরচিতে শ্রীমধ্ববিজয়ে
আনংদাংকিতে দ্বিতীয়ঃ সর্গঃ ||